॥छ॥ ॥ ॥इतितुलस्युद्वाहप्रारंभः॥छ॥श्रीरामप्रसन्नोवरदोभवतु॥छ॥ ॥

॥श्रीगणेशायनमः॥ ॥नत्वाश्रीरामचरणौतुलस्युद्वाहकर्मणः॥प्रयोगोस्यये
नेसम्यक्सुखानुष्ठानसिद्धये॥कुमारसंहितांविष्णुयामलंपूर्वपद्धतीः॥आ
लोच्यसारमुद्धृत्यश्रद्धालुजनतुष्टये॥तत्रेमानिमूलवाक्यानि॥विष्णोरस्यप्रति
मांहैमींकुर्यात्सलक्षतुष्टये॥तदर्धार्धतदर्धार्धसंख्यावापिप्रकल्पये॥प्राण
प्रतिष्ठांकृत्वातुतुलसीविष्णुरूपयोः॥ततउत्थापयेद्देवंपूर्वोक्तैश्चस्मवादि
भिः॥उपचारैःषोडशभिःपूजयेत्पुरुषोक्तितः॥देवकालौततस्मृत्वागणे
शंचप्रपूजयेत्॥पुण्याहंवाचयित्वाचनांदीश्राद्धंसमाचरेत्॥वेदवाद्या
दिभिर्घोषैर्विष्णुमूर्तिंसमानयेत्॥तुलसीनिकटंसातुरुच्छाप्यांतरि ॥१॥

तापटौ॥आगच्छभगवन्देवअर्चयिष्यामिकेशव॥तुभ्यंदास्यामितुलसीसर्व
कामप्रदोभव॥दद्यात्त्रिवारमर्घ्यंचआद्यंविष्टरमेवच॥ततआचमनीयंचत्रि
रुक्त्वाचप्रदापयेत्॥ततोदधिघृतंक्षौद्रंकांस्यपात्रपुटीकृतं॥मधुपर्कंगृहा
णत्वंवासुदेवनमोस्तुते॥हरिद्रालेपनाभ्यंगंकार्यंसर्वविधायच॥गोधूलिसम
येपूज्यातुलसीकेशवोपुनः॥पृथक्पृथक्ततःकार्यासन्मुखंमंगलंपठन्॥
उषद्वयेभास्करेतुसंकल्पंतुसमाचरेत्॥स्वगोत्रप्रवरानुक्त्वातथात्रिपुरुषादि
कं॥अनादिमध्यंनिधनंत्रैलोक्यप्रतिपालकं॥उमोद्वाहेतुलसीविवाहविधि
नेश्वर॥पार्वतीबीजसंभूतांदामभस्मनिसंस्थितां॥अनादिमध्यनिधनांवल्लभां
तेददाम्यहं॥पयोघटैश्चसेवाभिःकन्येवाद्धितामया॥तस्मियांतुलसींतुभ्यंदा

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

स्वामिलांगूलाणभो॥एवंदत्वाचतुलसीपश्चान्नोपूजयेत्ततः॥रात्रौजागरणंकुर्या
द्विधानोत्सवपूर्वकं॥प्रतिवर्षमिदंकुर्यात्कार्त्तिकव्रतसिद्धये॥ततःप्रभातसमये
तुलसींविष्णुमर्चयेत्॥वह्निसंस्थापनंकुर्याद्वादशाक्षरविद्यया॥पायसाज्यक्षौ
द्रतिलैर्होमंसमाप्तेत्तरंहरेः॥ततःस्विष्टकृतंदद्याद्दत्वापूर्णाहुतिंततः॥आचार्यंचस
मभ्यर्चहोमशेषंसमापयेत्॥चतुरोवार्षिकान्मासान्नियमोयस्ययोकृतः॥क
थयित्वाद्विजेभ्यश्चदत्त्वात्वान्परिपूजयेत्॥इदंव्रतंमयादेवकृतंप्रीत्यैतवप्रभो
॥न्यूनंसंपूर्णतांयातुत्वत्प्रसादाज्जनार्दन॥रेवतीतुर्यचरणेद्वादशीसंयुतेनरः॥
नकुर्यात्सारणंतस्यव्रतंनिष्फलतांव्रजेत्॥ततोयेषांपदार्थानांवर्जनंतुकृतंभवेत्॥
चातुर्मास्येथवाचार्यब्राह्मणेभ्यःसमर्पयेत्॥ततःसर्वसमानीयाद्यद्यत्कंश्र ॥२॥

नेच्छेत्॥इदंपत्नीनांसदेवात्रभोक्तव्यंद्विजैःसह॥ततभुक्त्वात्वरंयानिगलि
तानिदलानिच॥स्वयंतुलस्यानानूभुक्त्वासर्वपापैःप्रमुच्यते॥इक्षुखंडंत
थाधात्रीफलंकोलिफलंतथा॥भुक्त्वातुभोजनस्यांतेतस्योच्छिष्टंविनश्यति॥
एषुत्रिपुतभोक्तंचेदेकैकमपियेनतु॥क्षयउच्छिष्टआवर्षंनासौतत्रसंशयः॥
ततःसायंपुनःपूजाइक्षुदंडैश्चशोभने॥तुलसीवासुदेवौचकृतकृत्योभवे
त्ततः॥ततोविसर्जनंकुर्यादितादायादिकंहरेः॥गच्छगच्छसुरश्रेष्ठस्वस्था
नेपरमेश्वर॥यत्रब्रह्मादयोदेवास्तत्रगच्छजनार्दन॥एवंविसर्जदेवेशमा
चार्यायप्रदापयेत्॥सूत्यादिकंसर्वमेवकृतकृत्योभवेन्नरः॥प्रतिवर्षकरोसे
वंतुलस्युद्वाहनंशुभं॥इहलोकेपरत्रापिविपुलंसुखमेधते॥प्रतिवर्षंतुयो

कुर्यात्तुलसीकरपीडनं॥ भक्तिमान्धनधान्यैः सयुक्तो भवतिनिश्चितं॥ इतितुल
सीविवाहः॥ ध॥ अथैतदनुसारीप्रयोगः॥ तत्रयद्यपिमूलवचनेषुविष्णुप्रतिमा
स्थापनपूजादिविवाहविधिमुक्त्वादेवाग्रेचातुर्मास्यव्रतनियमसमाप्तिरुक्ता
तेनप्रबोधिन्याएकादश्यामेवायंविवाहविधिः॥ द्वादश्यांहोमादिशेषानुष्ठा
नमितिद्विदिनद्वयसाध्यंप्रतीयते॥ तथाचहेमाद्रौपाद्मे॥ कार्त्तिकेशुक्लनव
मीवाप्यविजितेंद्रियः॥ हरिंविहायसोनर्णंतुलस्यासहितंविभुं॥ पूजयेद्विधि
वद्दत्त्वाव्रतीतत्रदिनत्रयं॥ ततोयथोक्तदिधिनाकुर्याद्वैवाहिकंविधिं॥ इति
विष्णुविग्रहव्रतेनवमीप्रभृतिपूजापूर्वकविवाहविधेरुक्तत्वात्॥ विवाहस्य ॥२॥

चदिनचतुष्टयसाध्यत्वात्सर्वनिबंधेषुनवद्यांतुलसीविवाहस्योक्तत्वात्॥
नवमीप्रभृतिद्वादशीपर्यंतंसिध्यति॥ यजमानःपूर्वसंवर्धितंतुलस्युपरि
समंतात्चतुरस्रंचतुर्हस्तंपुष्पमालाफलपल्लवादिशोभितंविवाहमंडपं
तन्मध्येतुलस्याग्नेदेवोपवेश्यानार्थमेकंपीठंद्वितीयंमंडपमध्येतुलस्याद्
क्षिणेभागेतृतीयंस्वगृह्येशानदेशेवंपीठत्रयंचतुलस्याउत्तरतःहोमा
र्थंस्थंडिलंहरिद्राकुंकुमादिमांगल्यकद्रव्याणिकमेणयोगीत्यन्यानिचसंपाद
येत्॥ एवंसंभृतसंभारःनवम्यां॥ विनायकंतुसंपूज्यग्रहांश्चैवविधानतः॥
कर्मणांफलमाप्नोतिश्रियंप्राप्नोतिसुव्रतेइतिवचनात्॥ कर्मफलावाप्तये
श्रीप्राप्तयेचतुलसीविष्णुविवाहेग्रहानुकूल्य सिद्धिद्वारांगभूतगणप

तिपूर्जनंग्रहयज्ञंकरिष्ये॥ग्रहयज्ञंविधायरत्नं च गृहेस्नानेशुचौदेशेसप
लीकःकृतमांगलीकस्नानमाचांतःप्राणानायम्यदेशकालौसंकीर्त्यक
रिष्यमाणतुलसीविवाहांगभूतंतुलसीमूर्तेःश्रीकृष्णमूर्तेश्चप्रतिष्ठापूर्व
कंपूजनमहंकरिष्ये॥इतिसंकल्प्य॥पलनद्धनद्धान्यतमानेनास
भवेद्वाऽन्यानुसारेणसुवर्णनिर्मितांश्रीकृष्णमूर्तितुलसीप्रतिमांचपूर्वक
तपीठेकृताग्न्युत्तारणंप्रतिष्ठाप्यपुरुषसूक्तविधिनाषोडशोपचारैःपूज
येत्॥गीतवाद्यमांगलिकसूक्तपाठादिउक्तवदविधेयं॥ब्राह्मणासंपू
ज्यभूयसीदद्यात्स्ववर्गिकान्भोजयेत्॥सुहृत्सहभुंजीत॥इतिनवमी ॥४॥

कृत्यं॥दशम्यांप्रतिष्ठारहितंपूर्ववत्पूजनाद्युत्सवांतं॥भूयसीदद्यात्॥
शक्त्यनुसारेणब्राह्मणान्भोजयेत्स्वयंभुंजीत॥इतिद्वादशीकृत्यं॥एका
दश्यांकृतप्रातःस्नानक्रियादेवर्षीषोडशोपचारैःपूर्ववत्संपूज्यप्रधानसं
कल्पंकुर्यात्॥ततोदेवस्यतुलस्याश्चविवाहवत्तैलहरिद्रारोपणादि
मांगलिकादिकृत्वादद्याकालाद्युल्लेखांतंमज्जन्मप्रभृत्युपार्जितका
यिकवाचिकादित्रिविधपापक्षयपूर्वकंसमस्तपितृणांनिरतिशयसानंदब्रह्मलोका
वाप्त्यादिकन्यादानफलपुत्रपौत्राद्यवच्छिन्नसंततिलक्ष्मीप्राप्त्या
दिकल्पोक्तफलसिध्यर्थंतत्रविष्णुप्रीत्युद्देकाविष्कारद्वारःकरणता

सा दिसाधनाद्दितवैकुंठभवनगमनत्रयविपुलभोगभोगोत्तरविष्णुसायुज्य
कामःश्रीपरमेश्वरप्रीतिकामोवाश्रीकृष्णप्रसादतुलसीविवाहाख्यंकर्मा
हंकरिष्ये॥तदंगभूतंगणपतिपूजनपूर्वकंस्वस्तिपुण्याहवाचनंमातृका
पूजननांदीश्राद्धंआचार्यऋत्विग्वरणंकरिष्ये॥इतिसंकल्प्य॥गणप
तिपूजनपूर्वकंनांदीश्राद्धांतेरंगनंदांतंकुर्विनंस्यङ्गारवाध्यायिनं
आचार्यंब्रह्मसदस्यौमंगलसूक्तपाद्यार्घ्यैऋत्विजश्चवरयुयात्॥ते
चऋत्विजश्चवारइतियामले॥ततःवस्त्राभरणादिःआचार्यादीन्
संपूज्यप्रार्थयेत्॥एतदंतंकृत्वाब्राह्मणान्गंधादिभिःसंपूजितेभ्यो भूय
सींदक्षिणांदद्यात्॥ततःसायंकालेयजमानःआचार्यर्त्विक्पुरंध्रीस ॥५॥

हितःमांगलिकगीतवाद्यावर्त्विक्कर्तृकवेदघोषपुरःसरंदेवसमीप
मागत्यदेवंसंपूज्यततःउत्थापयेदेवंपूर्वोक्तैश्चस्तवादिभिःइतिवचनात्
उत्तिष्ठ पूर्वोक्तप्रबोधकरणोक्तैः॥उत्तिष्ठेत्यादिभिर्मंत्रैर्ब्रह्मेंद्रशक्रीयतनेत्॥उदे
तिष्ठुरितिवैदिकेनचशंखभेरीवीणामृदंगनृत्यगीतादिपुरःसरंदेवंउत्था
पयेत्॥तेचमंत्रः॥उत्तिष्ठोत्तिष्ठशंखघ्नउत्तिष्ठोभोधितारक॥कूर्मरूप
धरोत्तिष्ठत्रैलोक्यंमंगलंकुरु॥१॥उत्तिष्ठोत्तिष्ठवाराहदंष्ट्रोद्धृतवसुंधर॥
हिरण्याक्षप्राणघातिन्त्रैलोक्यमंगलंकुरु॥हिरण्यकशिपुघ्नस्यप्रल्हा
दानंदकारक॥लक्ष्मीपतेसमुत्तिष्ठस्त्रैलो॥३॥उत्तिष्ठबलिदर्पघ्नदेवेंद्र
पदायक॥उत्तिष्ठदितिपुत्रघ्नत्रैलो॥४॥उत्तिष्ठहैहयाधीशसमस्तकुल

नाशन॥रेणुकात्मजत्वमुत्तिष्ठत्रै०॥५॥उत्तिष्ठरक्षोदलनश्रयोध्यास्वर्गदायक॥
समुद्रसेतुकर्मरतत्रै०॥६॥उत्तिष्ठसैंहरणमर्दचूर्णितलोचन॥उत्तिष्ठहलपाणेत्रै०॥७॥उत्तिष्ठलंगयावासिन्द्रश्रुलोकीकवर्तिका॥उत्तिष्ठपद्मासनगत्रै०॥८॥
उत्तिष्ठम्लेछनिवहसदासंहारकारक॥अश्ववाहयुगांतेत्रै०॥९॥उत्तिष्ठोत्तिष्ठ
गोविंदउत्तिष्ठगरुडध्वज॥उत्तिष्ठकमलाकांतत्रै०॥१०॥ब्रह्मेंद्ररुद्राग्निकु
बेरसूर्यसोमादिभिर्वंदितवंदनीय॥बुध्यस्वदेवेशजगन्निवासमंत्रप्रभावेन
सुरवेनदेव॥इदंविष्णु०॥ततोदेवंपुरःसूक्तेनषोडशोपचारैःपूर्ववत्संपूज्यदेवंतु
लसीप्रतिमासहितंवाहनारूढंकृत्वाआचार्यादिभिःसहमंगलवाद्यवेदघो
षपुरःसरंदेवंविवाहमंडपमानयेत्॥मंडपाद्बहिःप्रदेशेसीमंतमालक्ष्य
देवस्यवस्त्रालंकारादिभिःपूजांकुर्यात्॥इत्याचारः॥ततोमंडपांतःतुलसीस ॥६॥

मीपेपूर्वकल्पितद्वितीयपीठेदेवमुपवेश्यगंधवस्त्रादिभिःसंपूज्य॥आगच्छभग
ष्या गवन्देवअर्चयैभिकेशव॥तुभ्यंदास्यामितुलसींसर्वकामप्रदोभव॥इतिवा
क्दानंविधाय॥स्वशाखोक्तविधिनामधुपर्कंकुर्यात्॥तत्रमधुपर्कदानावस
रे॥ततोदधिघृतंक्षौद्रंकांस्यपात्रपुटीकृते॥मधुर्कंगृहाणत्वंवासुदेवनमोस्तुते॥
देशकालकीर्त्तनांतेश्रीलक्ष्मायतुलसीविवाहांगभूतंमधुपर्ककरिष्ये॥विष्णो
विष्णोविष्णुः॥एवंपाद्यार्घ्याचमनीयमधुपर्कादिसर्वत्रभिरुद्दःकार्यः॥मधुप
र्कंगृहाणत्वंवासुदेवनमोस्तुते॥इतिविशेषः॥गोरूपसर्गादिगंधमाल्यवस्त्रयु
गोपवीतयुगाभरणादियथाविभवंपूजयेत्॥ततोगोधूलकसमयेदेवंतुलसी
प्रतिमायांचसंपूज्यतुलसीरक्षनिकटेपीठोपरिसुवर्णतुलसीस्थाप्यतत्समु सं२
रवेश्रीकृष्णमूर्तिंविस्थाप्यमध्येअंतःपटंउदगग्रंअपसार्यब्राह्मणैःमंगलेसूक्तपाठंसुवा

सिनीभिः मंगलगीतंचकारयेत्॥सुमुहूर्तेसध्यांतःपाटउद्घाप्यसार्यवधूवरयोः
परस्परवीक्षणंभारयेत्॥अत्रऋक्वोऽदमग्रेरस्यादिपठंति॥ततोयजमानःदेश
कालाद्युल्लेखांते॥ममजन्मप्रभृत्युपार्जितकायिकादित्रिविधपापक्षयसमस्तपि
तृणांनिरतिशयसानंदब्रह्मलोकावाप्त्यादिकन्यादानफलपुत्रपौत्राद्यनवछिन्न
संततिलक्ष्मीप्राप्त्यादिकाम्योक्तफलसिध्यनंतरंविष्णुभक्त्युद्रेकाविष्कारद्वारः
करणत्वादिसाधनासादितवैकुंठभवनगमनत्रसविपुलभोगभोगोत्तरंविष्णुसा
युज्यकामश्रीपरमेश्वरप्रीत्यर्थंश्रीलक्ष्मीयुतुलसीकन्याप्रदानंकरिष्ये॥इति
संकल्प्य॥सपत्नीकोध्याय॥स्वस्त्यस्तु॥दीर्घमायुरस्तु॥शिवाआपःसंतु॥सौमन
स्यमस्तु॥अक्षतंचारिष्टंचास्तु॥दीर्घमायुःश्रेयःश्रीरस्तु॥तिःपुष्टिस्तुष्टिश्चास्तु॥य
च्छ्रेयस्तदस्तु॥यच्चापंतत्प्रतिहतमस्तु॥पुण्याहंभवंतोब्रुवंतु॥स्वस्तिंभवंतोब्रुवंतु॥ ॥७॥

वं

ऋद्धिंभवंतोब्रुवंतु॥श्रीरस्तिभवंतोब्रुवंतु॥ततःस्वगोत्रप्रवरानुक्त्वातथात्रिपुरुषा
दिकंउक्त्वात्॥गोत्राद्युच्चारंकुर्यात्॥यथाअमुकप्रवरान्वितोअमुकगोत्रोऽहंनःअ
मुकस्यप्रपौत्रअमुकस्यपौत्रःअमुकस्यपुत्रःअमुकशर्माहं॥अत्रदेवस्यतुलस्या
श्च॥अनादिमध्यनिधनेतिमंत्रवर्णात्नगोत्राद्युच्चारः॥ततपूर्वोक्तसंकल्पवाक्युलेखां
ते॥अनादिमध्यनस्त्रैलोक्यप्रतिपालकाइमांगृहाणतुलसीविवाहविधिनेश्वर॥पा
र्वतीबीजसंभूतांवृंदाभस्मनिसंस्थितं॥अनादिमध्यनिधनांवल्लभांतेददाम्यहं॥पयो
घटैश्चसेवाभिःकन्यांवर्द्धितामया॥तस्मैतुलसीतुभ्यंदास्यामिलांगृहाणभोर
नि॥इमांसालंकारांतुलसीतुभ्यमहंसंप्रददेएवंविचारंदद्यात्प्रतिमाहस्तेदद्यात्॥तु
लसीदानसांगतासिध्यर्थंयथाशक्तिसुवर्णदक्षिणांप्रतिमाहस्तेदद्यात्॥ततःगो
भूवाजिगजदासदासीशय्यालंकारादियथाविभवंदद्यात्॥पुनःश्रीकृष्णतुलस्यौदंप

तीपूजयेत्॥कर्मसांङ्गसुपूर्त्यर्थंब्राह्मणेभ्योभूयसींदक्षिणांदद्यात्॥अस्यांरात्रौसुहृन्मि
त्रायुपेतोनानाविधगीतवाद्यमांगल्यघोषादिउत्सवंकुर्यात्॥जागरणंकुर्यात्॥एवं
रात्रिमतिवाह्य॥प्रभातेकृतनित्यक्रियःतुलसीकृष्णंचपूर्ववदभ्यर्च्य॥ततःआचार्यः
पूर्वकल्पितरङ्गोलिपश्चिमभागेदेवस्योत्तरतःउपविश्यस्वशाखोक्तविधिनाअ
ग्निस्थापनादिआज्यभागांतंकृत्वा॥ॐनमोभगवतेवासुदेवायइतिमंत्रेणपाद्य
साज्यमधुतिलैःप्रत्येकंससप्तविंशतिरित्येनमष्टोत्तरशतंप्रत्येकमष्टोत्तरशतंवाहुत्वास्वि
ष्टकृताद्युत्तरांगानिकुर्यात्॥यजमानान्वारब्धःपूर्णाहुतिंहुत्वाहोमशेषंसमापयेत्॥
यजमानःआचार्यादीन्समभ्यर्चकर्मेश्वरार्पणंकुर्यात्॥तथाशक्तिसुवासिनीब्राह्मणां तोय
भ्यभोजयेत्॥ततःदेवस्याग्रे॥इदंव्रतंमयादेवकृतंप्रीत्यैतवप्रभो॥न्यूनंसंपूर्णतांयातु
त्वत्प्रसादाज्जनार्दन॥इतिमंत्रेणचातुर्मास्यव्रतसमाप्तिंकृत्वासुहृद्युक्तोभुंजीयात्॥
भोजनांतेस्वयंगृहीतंतुलसीदलानिइक्षुखंडधात्रीफलबदरीलंचदेवायनिवेदितंभक्षयेत्॥

ततःसायंकालेइक्षुदंडधात्रीफलाद्यन्वितैःनानोपचारैःतुलसीकृष्णंचपूजयेत्॥ततः
वरूपिणेश्रीकृष्णायतुलीविवाहसांगतायेदायादिकंदत्वा॥वैकुंठगच्छभगवन्तुलसी
सहितेप्रभो॥गृहीत्वामत्कृतांपूजांप्रसन्नोभवसर्वदा॥गच्छगच्छसुरश्रेष्ठस्वस्थानेप
रमेश्वर॥इष्टकामप्रसिध्यर्थंपुनरागमनायच॥इतिमंत्राभ्यांदेवंविसर्जयेत्॥प्र
तिमादिकंआचार्यहस्तेप्रतिपादयेत्॥ॐततःसाद्गुण्यार्थंनानामगोत्रान्ब्राह्मणान् ना
गंधादिभिःसंपूज्यतेभ्योदक्षिणांदत्वाआशिषोगृह्णीयात्॥श्रीगजाननार्पणमस्तु

॥ध॥ ॥ ॥इतितुलस्युद्वाहसमाप्तः॥ध॥ ॥ ॥

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017